# ।। श्री गोरक्ष रहस्यम् ।।

सती पार्वत्युवाच -

भगवन् देवदेवेश रहस्य गोरक्षाय मे ।
ब्रूहियेन भक्तिं कुर्यात् साधको गोरक्ष शिवम् ।।१।।
श्रुणु देवि परं गोप्यं कथयामि सुशोभनं ।
रहस्यं सिद्धिदं साक्षात् गोरक्षस्य महात्मन:।।२।।
गुरु गोरक्षनाथस्य साधने ये निरुपिता: ।
उपाया निष्फला: सर्वे विना ध्यायेन सर्वथा ।।३।।
यो ध्यानं साधनं हित्वा उपायं चान्यथा श्रयेत ।
न स: सिद्धिमवाप्नोति नरो वर्ष शतैरपि ।।४।।
स्वयं ज्योति: स्वरुपोऽयं शून्याकारो निरंजन: ।
दशदिक्षु सदा व्याप्त: गोरक्ष: प्रथित: प्रभु: ।।५।।
अहमेवास्मि गोरक्षो मद्रूपस्तन्निभोऽधत ।
योगमार्ग प्रचारार्थ मया रुपमिदं धृतम् ।।६।।
यस्य शून्यमयी माता यस्य चाविगत: पिता ।
निरंजनो महायोगी गोरक्ष: सर्वदा गुरु: ।।७।।
रुद्राक्षमालाधर: शान्त: कुण्डल प्रभयान्वित:
भुजंग मेखलादिव्य जती गोरक्ष शोभन: ।।८।।
गजासुर-विमर्दी च भूत बेताल शोभित: ।
श्मशानारण्यवासी कर्परालङ्कृत: शिव: ।।९।।
ज्ञानवन्त: दयावन्त: मम प्रिय स्वरुपज: ।
उत्पत्ति स्थिति संहाराय गोरक्षाय नमो ऽऽएशम् ।।१०।।
यतीन्द्रं योगीन्द्रं सकल वसुधाया हितकरं ।
सदा सेव्यं भव्यं कलिमल-दहं साधु सुखदम् ।।
परंपारं ज्योतिर्जं निभृतहरं कारणं परम् ।
भजेत् तत्रुपं श्रुति कीर्तितं नतपदं गोरख प्रियम् ।।११।।

सुरेशं योगीशं निखिलजनत्रयतापहरं ।
दयालुं गोपालं निजजनसदा पालने तत्परम् ।।
स्वभक्तेभ्यो योगं वितरति सदाकष्टहरणाय ।
भजे तं तत्रुपं श्रुतिकथितंनतपदं गोरख प्रियम् ।।१२।।
ब्रह्मा विष्णुश्च रुद्रश्च मरीच्याद्या महर्षयः ।
गोरक्षं प्रणमन्ति तं सदा सम्पन्न मानसम् ।।१३।।
महायोगी कृपासिन्धु नानाभरणैः भूषितम् ।
धर्मार्थं काममोक्षाणां दातारं तं नमाम्यहम् ।।१४।।
श्रुणुदेवि प्रवक्ष्यामि गोरक्ष मंत्रमुत्तमम् ।
येन मंत्र प्रभावेन जतीजाप शुभोभवेत् ।।१५।।
अनेन मंत्रजापेन गोरक्ष दर्शनं लभेत् ।
अतिगुह्यतरं देवी देवानामपि दुर्लभम् ।।१६।।
गोपनीय प्रयत्नेन स्वयोनिरिव पार्वती ।
मारणं मोहनं वश्यं स्तम्भनोच्चाट्नादिकम् ।।१७।।
पाठमात्रेण संसिद्धयेत् गोरक्ष स्तोत्रमुत्तमम् ।।१८।।
ॐ ह्रीं श्रीं गों गोरक्षनाथाय विद्महे शून्यपुत्राय धीमही ।
तन्नो गोरक्ष निरन्जनः प्रचोदयात् ।।
ॐ ह्रीं श्रीं गों हुं फट् स्वाहा ।।
ॐ ह्रीं श्रीं गों गोरक्ष हुं फट् स्वाहा ।।
ॐ ह्रीं श्रीं गों गोरक्ष निरंजनात्मने हुं फट् स्वाहा ।।
ॐ शिव गोरक्ष योगी ।।
एवं ध्यात्वा जपित्वा च साधकाः शुद्ध-मानसाः ।
साधयेत् सर्व कार्याणि नात्र कार्याविचारणा ।।१९।।
यो धारयेन्नरो नित्यं मन्त्रराजं विशेषतः ।
सा योगसिद्धमाप्नोति गोरक्षस्य प्रसादतः ।।२०।।
नमस्ते रुद्ररुपाय सादेशं शत्रुमर्दिनां ।
नमः जती महायोगी सादेशं आत्मदर्शनम् ।।२१।।
नमस्ते विघ्नहर्ताय कामक्रोधादि नाशिने ।
जाग्रतं हि महायोगी जप-सिद्धि कुरुष्व मे ।।२२।।

ॐकार सृष्टीरुपाय ह्रींकार प्रतिपालने ।
श्रींकार वरदायकाय गोंकार योगरुपिणे ।।२३।।
गोरक्ष गोरक्षाय बीज रुपं नमोस्तुते ।
विद्महे चाभयदाय नित्यादेश मंत्र-रुपिणे ।।२४।।
शुंश-शान्तिरुपाय शून्य-पुत्राय आदेशं ।
धीमहित् ज्ञानरुपाय तन्नो रुपाय नाथस्य ।।२५।।
निरंजनो निराकार गोरक्ष निरंजनात्मने ।
हुं हुं हुंकार रुपाय जं जं जती गोरक्षस्य ।।२६।।
भ्रां भ्रीं भ्रूं भैरवनाथाय मोक्ष-मुक्तिदायकम् ।
धां धीं धूं धर्मनाथाय महानाथो नमो नमः ।।२७।।
सां सीं सूं सर्वांगनाथाय महासिद्धं नमो ऽऽदेशम् ।
कां कीं कूं कलेश्वराय महाकाल कालरुपाय ।।२८।।
लां लीं लूं च लाल ग्वालाय महायोगी योग लिलाय ।
वां वीं वूं विघ्ननाशाय विमलनाथो नमो नमः ।।२९।।
गों गीं गूं गुरु गोरक्षाय सर्वत्र रोग नाशाय ।
जूं सः मृत्युंजयाय च महाकाल नमो नमः ।।३०।।
खड्दर्शन गोरक्षाय खां खीं खूं खेचरी तथा ।
रां रीं रुं रहस्य नाथ मन्त्र सिद्धि कुरुष्व मे ।।३१।।
इदं गोरक्ष रहस्य मंत्रो जागरति यव हेतवे ।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ।।३२।।
पाठमात्रेण मन्त्राणामुच्यते सर्व किल्विषैः ।।३३।।
रहस्यं ध्यानमुत्तमम् गुह्याद् गुह्यतरं महत् ।
तस्माद् सर्व प्रयत्नेन सर्वकाम-फल-प्रदम् ।।३४।।
नाथरहस्य प्रसादेन त्वं सर्वमान्यो भविष्यसि ।
सर्वरुपमयो नाथः नाथमयं जगत् ।।३५।।
विश्वरुपं परमयोगी अतोहं आदेशं कुरु ।।३६।।

******